भाषानामकाः कृतान्नभेदास्तत्साधनप्रकाराश्च भावप्र० दर्शिता यथा

"अथ कृतान्नवर्गः तत्रान्नानां साधनप्रकारः सिद्धानां गुणाश्च तत्र परिभाषा । समवायिनि हेतौ ये मुनिभिर्भणिता गुणाः । कार्य्येऽपि तेऽखिला ज्ञेयाः परिभाषेति भाषिता । क्वचित्संस्कारभेदेन गुणभेदो भवेद्यतः । भक्तं लघु पुराणस्य शालेस्तच्चिपिटो गुरुः । क्वचिद्योगप्रभावेन गुणान्तरमपेक्षते । कदन्नं गुरु सर्पिश्च लघू तत्संहितं भवेत् ।

अथ भक्तस्य नामानि साधनं गुणाश्च । भक्तमन्नं तथान्धश्च क्वचित् कूरञ्च कीर्त्तितम् । ओदनोऽस्त्री स्त्रियां भिस्सा-दीदिवः पुंसि भाषितः । सुधौतांस्तण्डुलाः स्फीतांस्तोये पञ्चगुणे पचेत् । तद्भक्तं प्रस्रुतं चोष्णं विशदं गुणवन्मतम् । भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु । अधौतमस्रुतं शीतं गुर्वरुच्यं कफप्रदम् ।

अथ (दालि) । दलितन्तु शमीधान्यं दालिर्दाली स्त्रियामुभे । दाली तु सलिले सिद्धा लवणार्द्रकहिङ्गुभिः । संयुक्ता सूपनाम्नी स्यात् कथ्यन्ते तद्गुणा अथ । सूपो विष्टम्भको रूक्षः शीतस्तु स विशेषतः । निस्तुषो भृष्टसंसिद्धः लाघवं सुतरां व्रजेत् ।

अथ (खिचिड़ी) । तण्डुला दालिसंमिश्रा लवणार्द्रकहिङ्गुभिः । संयुक्ताः सलिले सिद्धा कृशरा कथिता बुधैः । कृशरा शुक्रला बल्या गुरुः पित्तकफप्रदा । दुर्जरा बुद्धिविष्टम्भमलमूत्रकरी स्मृता ।

अथ तापहरी (ताताहरीति) लोके । घृते हरिद्रासंयुक्ते माषजाश्चार्ज्जयेद्वटीम् । तण्डुलांश्चापि निर्धौतान् सद्यैव परिभर्जयेत् । सिद्धियोग्यं जलं तत्र प्रक्षिप्य कुशलः पचेत् । लवणार्द्रकहिङ्गूनि मात्रया तत्र निःक्षिपेत् । एषा सिद्धिः समानज्ञा प्रोक्ता तापहरी बुधैः । एषा तापहरी बल्या वृष्या श्लेष्माणमाहरेत् । बृंहणी तर्पणी रुच्या गुर्वी पित्तहरी स्मृता ।

अथ क्षीरिका । पायसः परमान्नं स्यात् क्षीरिकापि तदुच्यते । शुद्धेऽर्द्धपक्वे दुग्धे तु घृताक्तांस्तण्डुलान् पचेत् । ते सिद्धा क्षीरिका ख्याता ससिताज्ययुतोत्तमा । क्षीरिका दुर्जरा प्रोक्ता बृंहणी बलवर्द्धिनी । नालिकेलन्तनूकृत्य छिन्नं पयसि गोः क्षिपेत् । सितागव्याज्यसंयुक्तं तत्पचेन्मृदुनाऽग्निना । नारीकेलोद्भवा क्षीरी स्निग्धा शीतातिपुष्टिदा । गुर्वी सुमधुरा वृष्या रक्तपित्तानिलापहा ।

अथ (सेवइ) । समितां वर्त्तिकां कृत्वा सूक्ष्मां तु यवसन्निभाम् । शुष्का क्षीरेण संसाध्या भोज्या घृतसितान्विता । सेविका तर्पणी बल्या गुर्वी पित्तानिलापहा । ग्राहिणी सन्धिकृद्रुच्या तां खादेन्नातिमात्रया ।

अथ (मण्डा) । गोधूमा धवला धौताः कुट्टिताः शोधितास्ततः । प्रोक्षिता यन्त्रनिष्पिष्टाश्चालिताः समिताः (मयदा) स्मृताः । वारिणा कोमलां कृत्वा समितां साधु मर्द्दयेत् । हस्ततलाननया तस्या लोप्त्रीं सम्यक् प्रसारयेत् । अधोमुखघटस्यैतत् विस्तृतं प्रक्षिपेद्बहिः । मृदुना वह्निना साध्यः सिद्धो मण्डक उच्यते । लोप्त्री (लाइ) । दुग्धेन साज्यखण्डेन मण्डकं भक्षयेन्नरः । अथ वा सिद्धमांसेन सतक्रवटकेन वा । मण्डको बृंहणो वृष्यो बल्यो रुचिकरो भृशम् । पाकेऽपि मधुरो ग्राही लघुर्दोषत्रयापहः ।

अथ (पोरी) कुत्रापि (दुनौरी) इति च । "कुर्य्यात् समितयाऽतीव तन्वी पर्प्पटिका ततः । स्वेदयेत्तप्तके (ताओया) तान्तु पोलिकां जगदुर्बुधाः । तां खादेत् सर्पिकायुक्तां तस्या मण्डकवद्गुणाः ।

अथ प्रसङ्गात् लप्सी । समितां सर्पिषा भृष्टां शर्करां पयसि क्षिपेत् । तस्मिन् घनीकृते न्यस्येल्लवङ्गं मरिचादिकम् । लप्सिका बृंहणी वृष्या बल्या पित्तानिलापहा । स्निग्धा श्लेष्मकरी गुर्वी रोचनी तर्पणी परम् ।

(रोटि) । शुष्कगोधूमचूर्णेन किञ्चित् पुष्टाञ्च पोलिकाम् । तप्तके (ताओया) । स्वेदयेत् कृत्वा भूर्य्यङ्गारेऽपि तां पचेत् । सिद्धैषा रोटिका प्रोक्ता गुणं तस्याः प्रचक्ष्महे । रोटिका बलकृद्रुच्या बृंहणी धातुवर्द्धनी । वातघ्नी कफकृद्गुर्वी दीप्ताग्नीनां प्रपूजिता ।

अथ (लिट्टी) शुष्कगोधूमचूर्णन्तु साम्बु गाढं विमर्द्दयेत् । विधाय वटकाकारं निर्धूमेऽग्नौ शनैः पचेत् । अङ्गारकर्कटी ह्येषा बृंहणी शुक्रला लघुः । दीपनी कफकृद्बल्या पीनसश्वासकासजित् ।

अथ (यवरोटी) । यवजा रोटिका रुच्या मधुरा विशदा लघुः । मलशुक्रानिलकरी बल्या हन्ति कफामयान् ।

अथ माषरोटिका । माषाणां दालयस्तोये स्थापितास्त्यक्तकञ्चुकाः । आतपे शोषिता यन्त्रे पिष्टास्ता धूमसी स्मृता । धूमसी रचिता चैव प्रोक्ता भर्ज्जरिका बुधैः । भर्ज्जरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ।

अथ चनकरोटिका । चनक्यारोटिका रूक्षा श्लेष्मपित्तास्रनु-